श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये उत्तरकाण्डे

# ॥ सप्तसप्ततितमः सर्गः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

श्री रङ्गरामानुज महादेशिकन्

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीसीतालक्ष्मणभरतशत्रुघ्नहनुमत्समेत श्रीरामचन्द्र परब्रह्मणे नमः

# ॥ सप्तसप्ततितमः सर्गः ॥

## महर्षिणागस्त्येन श्रीरामं प्रति स्वर्गिपुरुषकर्तृकशवभक्षणप्रसङ्गस्य श्रावणम्

पुरा त्रेतायुगे राम बभूव बहुविस्तरम्।
समन्ताद् योजनशतं विमृगं पक्षिवर्जितम्॥ 7.77.1 ॥

तस्मिन् निर्मानुषेऽरण्ये कुर्वाणस्तप उत्तमम्।
अहमाक्रमितुं सौम्य तदरण्यमुपागमम्॥ 7.77.2 ॥

तस्य रूपमरण्यस्य निर्देष्टुं न शशाक ह।
फलमूलैः सुखास्वादैर्बहुरूपैश्च पादपैः॥ 7.77.3 ॥

तस्यारण्यस्य मध्ये तु सरो योजनमायतम्।
हंसकारण्डवाकीर्णं चक्रवाकोपशोभितम्॥ 7.77.4 ॥

पद्मोत्पलसमाकीर्णं समतिक्रान्तशैवलम्।
तदाश्चर्यमिवात्यर्थं सुखास्वादमनुत्तमम्॥ 7.77.5 ॥

अरजस्कं तदक्षोभ्यं श्रीमत्पक्षिगणायुतम्।
तस्मिन् सरःसमीपे तु महदद्भुतमाश्रमम्॥ 7.77.6 ॥

पुराणं पुण्यमत्यर्थं तपस्विजनवर्जितम्।
तत्राहमवसं रात्रिं नैदाघीं पुरुषर्षभ॥ 7.77.7 ॥

प्रभाते कल्यमुत्थाय सरस्तदुपचक्रमे।
अथापश्यं शवं तत्र सुपुष्टमरजः क्वचित्॥ **7.77.8**॥

तिष्ठन्तं परया लक्ष्म्या तस्मिंस्तोयाशये नृप।
तमर्थं चिन्तयानोऽहं मुहूर्तं तत्र राघव॥ **7.77.9**॥

विष्ठितोऽस्मि सरस्तीरे किं न्विदं स्यादिति प्रभो।
अथापश्यं मुहूर्तात् तु दिव्यमद्भुतदर्शनम्॥ **7.77.10**॥

विमानं परमोदारं हंसयुक्तं मनोजवम्।
अत्यर्थं स्वर्गिणं तत्र विमाने रघुनन्दन॥ **7.77.11**॥

उपास्तेऽप्सरसां वीर सहस्रं दिव्यभूषणम्।
गायन्ति काश्चिद् रम्याणि वादयन्ति तथापराः॥ **7.77.12**॥

मृदङ्गवीणापणवान् नृत्यन्ति च तथापराः।
अपराश्चन्द्ररश्म्याभैर्हेमदण्डैर्महाधनैः॥ **7.77.13**॥

दोधूयुर्वदनं तस्य पुण्डरीकनिभेक्षणाः।
ततः सिंहासनं हित्वा मेरुकूटमिवांशुमान्॥ **7.77.14**॥

पश्यतो मे तदा राम विमानादवरुह्य च।
तं शवं भक्षयामास स स्वर्गी रघुनन्दन॥ **7.77.15**॥

ततो भुक्त्वा यथाकामं मांसं बहु सुपीवरम्।
अवतीर्य सरः स्वर्गी संस्प्रष्टुमुपचक्रमे॥ **7.77.16**॥

उपस्पृश्य यथान्यायं स स्वर्गी रघुनन्दन।
आरोढुमुपचक्राम विमानवरमुत्तमम्॥ **7.77.17**॥

तमहं देवसङ्काशमारोहन्तमुदीक्ष्य वै।
अथाहमब्रुवं वाक्यं तमेव पुरुषर्षभ॥ **7.77.18**॥

को भवान् देवसङ्काश आहारश्च विगर्हितः।
त्वयेदं भुज्यते सौम्य किमर्थं वक्तुमर्हसि ॥ **7.77.19** ॥

कस्य स्यादीदृशो भाव आहारो देवसम्मतः।
आश्चर्यं वर्तते सौम्य श्रोतुमिच्छामि तत्त्वतः।
नाहमौपयिकं मन्ये तव भक्ष्यमिमं शवम् ॥ **7.77.20** ॥

इत्येवमुक्तः स नरेन्द्र नाकी
　　कौतूहलात् सूनृतया गिरा च।
श्रुत्वा च वाक्यं मम सर्वमेतत्
　　सर्वं तथा चाकथयन्ममेति ॥ **7.77.21** ॥

॥ इत्यार्षे श्रीमद्रामायणे वाल्मीकीये आदिकाव्ये
उत्तरकाण्डे सप्तसप्ततितमः सर्गः ॥